तद्गायत्रं प्राणेषु प्रोतं स य एवमेतद्गायत्रं प्राणेषु प्रो
तं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रज

Takshashila Project

यापशुभिर्भवतिमहान्कीर्त्यामहामनास्यात्तद्व्रतं ११ अभि
मंथतिसहिंकारोधूमोजायतेसप्रस्तावोज्वलतिसउद्गीथों
गाराभवंतिसप्रतिहारउपशाम्यतितन्निधनं॰सं॰शाम्य
तितन्निधनमेतद्रथंतरमग्नौप्रोतं॰सयएवमेतद्रथंतरम
ग्नौप्रोतंवेदब्रह्मवर्चस्यन्नादोभवतिसर्वमायुरेतिज्योग्जीव
तिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्यानप्रत्यङ्ङग्निमा
चामेन्ननिष्ठीवेत्तद्व्रतं ॥ १२ ॥ उपमं—यतेसहिंकारोज्ञपयते ४८

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सःप्रस्तावःस्त्रियासहशेतेसउद्गीथःप्रतिस्त्रीसहशेतेस
प्रतिहारःकालंगच्छतितन्निधनंपारंगच्छतितन्निधनमेतद्वा
मदेव्यंमिथुनेप्रोतं॥सयएवमेतद्वामदेव्यंमिथुनेप्रोतंवेदमि
थुनीभवतिमिथुनान्मिथुनात्प्रजायतेसर्वमायुरेतिज्योग्जी
वतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्यानकांचनपरि
हरेत्तद्व्रतं॥१३॥उद्यन्हिंकारउदितःप्रस्तावोमध्यंदिनउद्गी
थोपराह्णःप्रतिहारोस्तंयंनिधनमेतद्बृहदादित्येप्रोतं॥स

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

यएवमेतद्बृहदादित्येसमोतंवेदतेजस्व्यन्नादोभवतिसर्वमा
युरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्यात
पंतेननिंदेत्तद्व्रतं॥१४॥अभ्राणिसंप्लवंतेसहिंकारोमेघोजा
यतेसप्रस्तावोवर्षतिसउद्गीथोविद्योततेस्तनयतिसप्रति
हारउद्गृह्णातितन्निधनमेतद्वैरूपंपर्जन्येप्रोतं॥सयएवमेत
द्वैरूपंपर्जन्येप्रोतंवेदविरूपाश्चसुरूपाश्चपशूनवरुंधे
सर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहा ४२

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

न्कीर्त्यावर्षंतंन्ननिंदेत्तद्व्रतं॥१५॥वसंतोहिंकारोग्रीष्मःप्रस्ता
वोवर्षाउद्गीथःशरत्प्रतिहारोहेमंतोनिधनमेतद्वैराजमृतु
षुप्रोतं॥सयएवमेतद्वैराजमृतुषुप्रोतंवेदविराजतिप्रजया
पशुभिर्ब्रह्मवर्चसेनसर्वमायुरेतिज्योग्जीवतिमहान्प्रजया
पशुभिर्भवतिमहान्कीर्त्यर्तून्ननिंदेत्तद्व्रतं॥१६॥पृथिवी
हिंकारोंतरिक्षंप्रस्तावोद्यौरुद्गीथोदिशःप्रतिहारःसमुद्रोनि
धनमेताःशाक्वर्योलोकेषुप्रोताःसयएवमेताःशाक्वर्योलो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

केषु प्रोतां वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महा
न्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न निंदेत्तद्व्रतं ॥ १७
अजा हिंकारोऽवयः प्रस्ता॰ गाव उद्गीथोऽश्वाः प्रतिहारः
पुरुषो निधनमेता रेवत्सः पशुषु प्रोताः स य एवमेता — व
त्सः पशुषु प्रोतद्वेद पशुमान्भवति सर्वमायुरेति ज्योग्जीव
ति महान्प्रजया पशुभिर्भवति महान्कीर्त्या पशून्न निंदेत्तद्व्रतं
॥ १८ ॥ लोमहिंकारस्त्वक्प्रस्तावो मांसमुद्गीथोऽस्थि प्रति

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

.Takshashila Project

हारोमज्जानिधनमेतद्यज्ञायज्ञीयमंगेषुप्रोतꣳसयएव
मेतद्यज्ञायज्ञीयमंगेषुप्रोतंवेदांगीभवतिनांगेनविहूर्छ
तिसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिम
हान्कीर्त्यासंवत्सरंमज्ज्ञोनाश्नीयात्तद्व्रतंमज्ज्ञोनाश्नीयादि
तिवा॥१९॥अग्निर्हिंकारोवायुःप्रस्तावआदित्यउद्गीथो
नक्षत्राणिप्रतिहारश्चंद्रमानिधनमेतद्वैराजंदेवतासु
प्रोतꣳसयएवमेतद्वैराजंदेवतासुप्रोतंवेदैतासामेव

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

देवतानां॰ सलोकतां॰ सार्ष्टितां॰ सायुज्यं गछति सर्वमा
युरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या
ब्राह्मणान्न निंदेत्तद्व्रतं ॥२०॥ त्रयी विद्या हिंकारस्त्रय इमे
लोकाः स प्रस्तावोग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि
वयां॰सि मरीचयः प्रतिहारः सर्पा गंधर्वाः पितरस्तन्निध
नमेतत्साम सर्वस्मिन्प्रोतं॰ स य एवमेतत्साम सर्वस्मिन्प्रो
तं वेद सर्वं॰ ह भवति तदेष श्लोको यानि पंचधा त्रीणि त्री ५१

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

णितेभ्योनज्यायः परमन्यदस्तियस्तद्वेदसवेदसर्वं सर्वा
दिशो बलिमस्मैहरंतिसर्वमस्मीत्युपासीतत्तद्व्रतंतद्व्रतं
२१॥ विनर्दिसाम्नोवृणेपशव्यमित्यग्नेरुद्गीथोनिरुक्तः
प्रजापतेर्निरुक्तःसोमस्यमृदुश्लक्ष्णंवायोश्लक्ष्णंबलव
दिंद्रस्यक्रौंचंबृहस्पतेरपध्वांतंवरुणस्यतान्सर्वानेवोप
सेवेतवारुणंत्वेववर्जयेदमृतत्वंदेवेभ्यआगायानीत्या
गायेत्स्वधांपितृभ्यआशांमनुष्येभ्यस्तृणोदकंपशुभ्यः

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

स्वर्गंलोकंयजमानायान्नमात्मनआगायानीत्येतानिमनसा
ध्यायन्नप्रमत्तःस्तुवीतसर्वेस्वराइंद्रस्यात्मानःसर्वऊष्माणः
प्रजापतेरात्मानःसर्वेस्पर्शामृत्योरात्मानस्तंयदिस्वरे
षूपालभेतेंद्रंशरणंप्रपन्नोभूवंसत्वाप्रतिवक्ष्यतीत्ये
नंब्रूयादथयद्येनमूष्मसूपालभेतप्रजापतिंशरणंप्र
पन्नोभूवंसत्वाप्रतिपेक्ष्यतीत्येनंब्रूयादथयद्येनंस्पर्शे
षूपालभेतमृत्युंशरणंप्रपन्नोभूवंसत्वाप्रतिधक्ष्य ५२

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

तीच्चैनंब्रूयात्सर्वेस्वराघोषवंतोबलवंतोवक्तव्याइंद्रेब
लंददानीतिसर्वऊष्माणोग्रस्ताअनिरस्ताविवृतावक्त
व्याःप्रजापतेरात्मानंपरिददानीतिसर्वेस्पर्शालेशेना
नभिनिहितावक्तव्यामृत्योरात्मानंपरिहराणीति॥२२॥
त्रयोधर्मस्कंधायज्ञोध्ययनंदानमितिप्रथमस्तपएव
द्वितीयोब्रह्मचार्याचार्यकुलवासीतृतीयोत्यंतमात्मा
नमाचार्यकुलेवसादयंत्सर्वएतेपुण्यलोकाभवंतिब्र

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ह्मसंस्थोमृतत्वमेतिप्रजापतिर्लोकानभ्यतपत्तेभ्योभित
प्तेभ्यस्त्रयीविद्यासंप्रास्रवत्तामभ्यतपत्तस्याअभितप्ता
याएतान्यक्षराणिसंप्रास्रवंतभूर्भुवःस्वरितितान्यभ्यत
पत्तेभ्योभितप्तेभ्यॐकारःसंप्रास्रवत्तद्यथाशंकुनास
र्वाणिपर्णानिसंतृण्णान्येवमोंकारेणसर्वावाक्संतृण्णों
कारएवेदंसर्वमोंकारएवेदंसर्वं॥२३॥ब्रह्मवादि
नोवदंतियद्वसूनांप्रातःसवनंरुद्राणांमाध्यंदिनं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सवनमादित्यानांचविश्वेषांचदेवानांतृतीयसवनंक्व
तर्हियजमानस्यलोकइतिसयस्तंनविद्यात्कथंकुर्याद
थविद्वांकुर्यात्पुराप्रातरनुवाकस्योपाकरणाज्जघने
नगार्हपत्यस्योदङ्मुखउपविश्यसवासवꣳसामाभिगा
यतिलो३कद्वारमपावा३र्णू३३पश्येमत्वावयꣳरा
३३३३हुं३आ३३ज्या३यो३आ३२१११इत्यथजुहोति
नमोऽग्नयेपृथिवीक्षितेलोकक्षितेलोकंमेयजमाना

Digitized by Vaidika Bharata Samrakshana Trust, Mahipur, New Delhi

Takshashila Project

यविंदेषवैयजमानस्पलोकएतास्म्यत्रयजमानःपरस्तादा
युषःस्वाहापजहिपरिघमित्युक्त्वोत्तिष्ठतितस्मैवसवःप्रा
तःसवनंसंप्रयच्छंतिपुरामाध्यंदिनस्यसवनस्योपाक
रणाज्जघनेनाग्नीध्रीयस्योदंमुखउपविश्यसरौद्र
ंसामाभिगायतिलो३कद्वारमपावा३र्णू३३पश्य
मत्वावयंविरा३३३३३ऊ३म्आ३३जा३यो३आ३२११
इत्यथजुहोतिनमोवायवेंतरिक्षक्षितेलोकक्षितेलो ५४

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

कं मे यजमानाय विंदे एष वै यजमानस्य लो॰

क एतास्म्यत्र यजमानः परस्तादायुषः स्वाहा अपजहि परिघ

मित्युक्त्वोत्तिष्ठति तस्मै रुद्रा माध्यंदिनं सवनं संप्रयच्छंति

पुरा तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मु

ख उपविश्य स आदित्यं स वैश्वदेवं सामाभिगायति

लो३कद्वारमपावा३र्णू३ पश्येम त्वा वयं स्वारा३३३३

हुं३ आ३३ ज्या३यो३ आ३१११ इत्यादित्यमथ वैश्वदे

वं लोकद्वारमपावा३र्णू३३ पश्येम त्वा वयं साम्रा३

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi

Takshashila Project

३३३३ऊ३श्रा३३जा३यो३श्रा३॥१ इत्यग्रजुहोति न
मस्त्रादित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षि
द्भ्यो लोकं मे यजमानाय विंदतैष वै यजमानस्य लोक
एतास्म्यत्र यजमानः परस्तादायुषः स्वाहापजहि परि
घमित्युक्त्वोत्तिष्ठति तस्मा आदित्याश्च विश्वे च देवास्तृ
तीयसवनं संप्रयच्छंत्येषु ह वै यज्ञस्य मात्रां वेद य एवं
वेद य एवं वेद ॥२४॥ इति चतुर्थः प्रपाठकः ॥ ॥ असो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

वाआदित्योदेवमधुतस्यद्यौरेवतिरश्चीनवंशोंतरि
क्षमपूपोमरीचयःपुत्राएतस्ययेप्रांचोरश्मयस्ताएवा
स्यप्राच्योमधुनाड्यऋचएवमधुकृतऋग्वेदएवपुष्पं
ताअमृताआपस्तावाएताऋचएतमृग्वेदमभ्यतपं
स्तस्याभितप्तस्ययशस्तेजइंद्रियंवीर्यमन्नाद्यंरसो
जायततद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वाएतद्यदेत
दादित्यस्यरोहितंरूपं॥१॥अथयेस्यदक्षिणारश्म

Takshashila Project

यस्ताएवास्यदक्षिणामधुनाड्योयजूंष्येवमधुकृतो
यजुर्वेदएवपुष्पंताअमृताआपस्तानिवाएतानियजूं
ष्येतंयजुर्वेदमभ्यतपंस्तस्याभितप्तस्ययशस्तेजइंद्रियं
वीर्यमन्नाद्यंरसोजायततद्व्यक्षरत्तदादित्यमभितो
श्रयत्तद्वाएतद्यदेतदादित्यस्यशुक्लंरूपं ॥२॥ अथयेस्य
प्रत्यंचोरश्मयस्ताएवास्यप्रतीच्योमधुनाड्यःसामान्येव
मधुकृतःसामवेदएवपुष्पंताअमृताआपस्तानिवाए ५९

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

तानिसामान्येतःसामवेदमभ्यतपंस्तस्याभितप्तस्ययश
स्तेजइंद्रियंवीर्यमन्नाद्यंरसोजायततद्व्यसरत्तदादित्य
मभितोऽश्रयत्तद्वाएतद्यदेतदादित्यस्यकृष्णंरूपं॥३॥
अथयेस्योदंचोरश्मयस्ताएवास्योदीच्योमधुनाड्योथर्वां
गिरसएवमधुकृतइतिहासपुराणंपुष्पंताअमृताआप
स्तावाएतेथर्वांगिरसएतदितिहासपुराणमभ्यतपंस्त
स्याभितप्तस्ययशस्तेजइंद्रियंवीर्यमन्नाद्यंरसोजायत

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

क्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परं
कृष्णꣳरूपं॥४॥अथयेऽस्योर्ध्वा रश्मयस्ता एवास्योर्ध्वा मधु
नाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आप
स्ता वा एता गुह्या आदेशा एतद्ब्रह्माभ्यतपꣳस्तस्याभितप्तस्य
यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳरसोऽजायत तद्व्यक्षरत्तदा
दित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य मध्ये क्षोभत इ
व ते वा एते रसानाꣳरसा वेदा हि रसास्तेषामेते रसास्तानि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृता
नि ॥५॥ तद्यत्प्रथमममृतं तद्वसव उपजीवंत्यग्निना मुखेनं
न वै देवा अश्नंति न पिबंत्येतदेवामृतं दृष्ट्वा तृप्यंति त एत
देव रूपमभिसंविशंत्येतस्माद्रूपादुद्यंति स य एतदेवम
मृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृ
ष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति
स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव ता

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वदाधिपत्यं स्वाराज्यंपर्येता॥६॥अथयद्वितीयममृतंतत
द्रुद्राउपजीवंतीइंद्रेणमुखेननवैदेवाअश्नंतिनपिबंत्येत
देवामृतंदृष्ट्वातृप्यंतितएतदेवरूपमभिसंविशंत्येतस्मा
द्रूपादुद्यंतिसयएतदेवममृतंवेदरुद्राणामेवैकोभूत्वें
द्रेणैवमुखेनैतदेवामृतंदृष्ट्वातृप्यतिसएतदेवरूपमभि
संविशत्येतस्माद्रूपादुदेतिसयावदादित्यःपुरस्तादुदेताप
श्चादस्तमेताद्विस्तावद्दक्षिणतउदेतोत्तरतोस्तमेतारु ५०

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

णामेवतावदाधिपत्यं स्वाराज्यंपर्येता ७ अथयत्तृ
तीयममृतंतदादित्याउपजीवंतिवरुणेनमुखेननवैदे
वाश्नंतिनपिबंत्येतदेवामृतंदृष्ट्वातृप्यंतितएतदे
वरूपमभिसंविशंत्येतस्माद्रूपादुद्यंतिसयएतदेव
ममृतंवेदादित्यानामेवैकोभूत्वावरुणेनेव —— नैतदे
वामृतंदृष्ट्वातृप्यतिसएतदेवरूपमभिसंविशत्येतस्मा
द्रूपादुदेतिसयावदादित्योदक्षिणतउदेतोत्तरतोस्त

Takshashila Project

मेताद्विस्तावत्पश्चाउदेतापुरस्तादस्तमेतादित्यानामेका
तावद्दाधिपत्यंस्वाराज्यंपर्येता॥४॥अथयत्पञ्चमममृतं
तन्मरुतउपजीवीतिसोमेनमुखेननवैदेवाअश्नंतिनपि
बंत्येतदेवामृतंदृष्ट्वातृप्यंतितएतदेवरूपमभिसंविशं
त्येतस्माद्रूपाडुद्यंतिसयएतदेवममृतंवेदमरुतामेवै
कोभूत्वासोमेनैवमुखेनैतदेवामृतंदृष्ट्वातृप्यतिसएत
देवरूपमभिसंविशत्येतस्माद्रूपाडुदेतिसयावदादित्य ५९

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ःपश्चादुदेतापुरस्तादस्तमेताद्विस्तावदुत्तरतउदेताद
क्षिणतोस्तमेतामरुतामेवतावदाधिपत्यंस्वाराज्यंप
र्येता॥१॥अथयत्पंचमममृतंतत्साध्याउपजीवंतिब्रह्म
णामुखेननवैदेवाअश्नंतिनपिबंत्येतदेवामृतंदृष्ट्वातृ
प्यंतितएतदेवरूपमभिसंविशंत्येतस्माद्रूपादुद्यंति
सयएतदेवममृतंवेदसाध्यानामेवैकोभूत्वाब्रह्मणैव
मुखेनैतदेवामृतंदृष्ट्वातृप्यतिसएतदेवरूपमभिसंवि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ञ्यएतस्माद्रूपाउदेतिसयावदादित्यउत्तरतउदेतादक्षिण
तोस्तमेताद्विस्तावदूर्द्ध्वउदेतावाङ्·स्तमेतासाध्यानामे
वतावदाधिपत्य॰ स्वाराज्यंपर्येता ॥१०॥ अथयतनजाद्विउ
देत्यनैवोदेतानास्तमेतैकलएवमध्येस्थातातानदेषश्लो
कोनवैतत्रननिम्लोचनोदियायकदाचनदेवास्तेनाह
॰ सत्येनमाविराधिषिब्रह्मणेतिनहवाअस्माउदेतिन
निम्लोचतिसकृद्दिवाहैवास्मैभवतियएतामेवंब्रह्मो ६०

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

पनिषदंवेदतद्धैतद्ब्रह्मा प्रजापतयउवाचप्रजापतिर्मन
वेमनुःप्रजाभ्यस्तद्धैतदुद्दालकायारुणयेज्येष्ठायपु
त्रायपिताब्रह्मप्रोवाचेदंवावतज्ज्येष्ठायपुत्रायपिता
ब्रह्मप्रब्रूयात्प्रणाय्यायवांतेवासिनेनान्यस्मैकस्मैच
नयद्यप्यस्माइमामद्भिःपरिगृहीतांधनस्यपूर्णांदद्या
देतदेवततोभूयइत्येतदेवततोभूयइति॥११॥गाय
त्रीवाइदंसर्वंभूतंयदिदंकिंचवाग्वैगायत्रीवाग्वाइ

Digitized by Vaidika Bharata/Supatha Trust, Maujpur, New Delhi.

Takshashila Project

दꣳ सर्वंभूतंगायतिचत्रायतेचयावैसागायत्रीयंवावसा
येयंपृथिव्यस्याꣳहीदꣳसर्वंभूतंप्रतिष्ठितमेतामेवना
तिशीयतेयत्रीयंवावसायेयंपृथिव्यस्याꣳहीदꣳसर्वं
भूतंप्रतिष्ठितमेतामेवनातिशीयतेयावैसापृथिवीयं
वावसायदिदमस्मिन्पुरुषेशरीरमस्मिन्हीमेप्राणाः
प्रतिष्ठिताएतदेवनातिशीयंतेयद्वैतत्पुरुषेशरीरमिदं
वावतद्यदिदमस्मिन्नंतःपुरुषेहृदयमस्मिन्हीमेप्रा ६१

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

णाःप्रतिष्टिताएतदेवनातिशीयंतेसैषाचतुष्पदाष।
ड्विधागायत्रीतदेतदृचाभ्यनूक्तंतावानस्यमहिमाततो
ज्यायांश्चपुरुषःपादोस्यसर्वाभूतानित्रिपादस्याम
तंदिवीतियद्वैतद्ब्रह्मेतीदंवावतद्योयंबहिर्धापुरुषाद
काशोयोवैसबहिर्धापुरुषादाकाशोयंवावसयोयमंतः
पुरुषआकाशोयोवैसोंतःपुरुषआकाशोयंवावस।
योयमंतर्हृदयआकाशस्तदेतत्पूर्णमप्रवर्त्तिनिपूर्ण

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

मप्रवर्त्तिनीः श्रियंलभतेयएवंवेद ॥ ९ ॥ तस्यहवाएतस्य
हृदयस्यपंचदेवसुषयःसयोस्यप्राङ्सुषिःसप्राणस्त
च्चक्षुःसआदित्यस्तदेतत्तेजोन्नाद्यमित्युपासीततेजस्व्य
न्नादोभवतियएवंवेदअथयोस्यदक्षिणःसुषिःसव्यान
स्तच्छ्रोत्रंसचंद्रमास्तदेतच्छ्रीश्चयशश्चेत्युपासीतश्रीमा
न्यशस्वीभवतियएवंवेदअथयोस्यप्रत्यङ्सुषिःसोपा
नःसावाक्सोग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपा ६२

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सीतब्रह्मवर्च्चस्यन्नादोभवतियएवंवेदाथयोस्योदंसु
षिःससमानःस्तन्मनःसपर्जन्यस्तदेतत्कीर्त्तिश्चव्युष्टि
श्चेत्युपासीतकीर्त्तिमान्व्युष्टिमान्भवतियएवंवेदाथ
योस्योर्द्ध्वःसुषिःसुषिःसउदानःसवायुःसआकाश
स्तदेतदोजश्चमहश्चेत्युपासीतौजस्वीमहस्वान्भवतिय
एवंवेदतेवाएतेपंचब्रह्मपुरुषाःस्वर्गस्यलोकस्यद्वार
पाःसयएतानेवंपंचब्रह्मपुरुषान्स्वर्गस्यलोकस्यद्वा

Digitized by Vaidika Bharati/Sureshchandra Mouleeen New Delhi

Takshashila Project

रपान्वेदास्यकुलेवीरोजायतेप्रतिपद्यंतेस्वर्गंलोकंयएता
नेवंपंचब्रह्मपुरुषांस्वर्गस्यलोकस्यद्वारपान्वेदाथयद
तःपरोदिवोज्योतिर्दीप्यतेविश्वतःपृष्ठेषुसर्वतःपृष्ठे
ष्वनुत्तमेषूत्तमेषुलोकेष्विदंवाववतद्यदिदमस्मिन्नंतः
पुरुषेज्योतिस्तस्यैषादृष्टिर्यत्रैतदस्मिंछरीरेसंस्पर्शे
नोष्णिमानंविजानातितस्यैषाश्रुतिर्यत्रैतत्कर्णावपि
गृह्यनिनदमिवनदथुरिवाग्नेरिवज्वलतउपशृणोति ६२

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

तद्देनद्दृष्टंचश्रुतंचेत्युपासीतचक्षुष्यःश्रुतोभवतियए
वंवेदयएवंवेद॥ १३ ॥सर्वंखल्विदंब्रह्मतज्जलानितिशां
तउपासीताथखलुक्रतुमयःपुरुषोयथाक्रतुरस्मिंलो
केपुरुषोभवतितथेतःप्रेत्यभवतिसक्रतुंकुर्वीतमनो
मयःप्राणशरीरोभारूपःसत्यसंकल्पआकाशात्मासर्व
कर्मासर्वकामःसर्वगंधःसर्वरसःसर्वमिदमभ्यात्तोवा
क्यनादरएषमआत्मांतर्हृदयेणीयान्व्रीहेर्वायवा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

यः वा द्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतंडुलाद्वैषम
आत्मांतर्हृदये ज्यायान्पृथिव्या ज्यायानंतरिक्षाज्ज्यायान्
दिवो ज्यायानेभ्यो लोकेभ्यः सर्वकर्मा सर्वकामः सर्वगंध
ः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मांत
र्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति यस्य स्या
द्द्धा न विचिकित्सास्तीति ह स्माह शांडिल्यः ॥१४॥ अंतरि
क्षोदरः कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्रक्त ६४

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

योद्यौरस्योत्तरं बिल———षकोशो वसुधानस्तस्मिन्वि।
श्वमिदं श्रितं तस्य प्राचीदिग्जुहूर्नाम सहमाना नाम द
क्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीची तासां वा
युर्वत्सः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदि
सोहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदं रुदमरि
ष्टं कोशं प्रपद्येमुनामुनामुना प्राणं प्रपद्येमुनामुनामु
ना भूः प्रपद्येमुनामुनामुना भुवः प्रपद्येमुनामुनामु

Digitized by Vaidika Bharata/Suparna Trust, Mayapur, New Delhi

Takshashila Project

नाख्वःप्रपद्येमुनामुनामुनासयदवोचंप्राणंप्रपद्यइतिप्रा
णोवाइदꣳसर्वंभूतंयदिदंचतमेवतत्प्रापत्स्यथयदवो
चंभूःप्रपद्यइतिपृथिवींप्रपद्येंतरिक्षंप्रपद्येदिवंप्रपद्य
इत्येवतदवोचमथयदवोचंभुवःप्रपद्यइत्यग्निंप्रपद्ये
वायुंप्रपद्यआदित्यंप्रपद्यइत्येवतदवोचमथयदवो
चꣳस्वःप्रपद्यइत्यृग्वेदंप्रपद्येयजुर्वेदंप्रपद्येसाम
वेदंप्रपद्यइत्येवतदवोचंतदवोचं ॥१५॥ पुरुषोवाव — ६५

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

स्त्तस्ययानिचतुर्विंशतिर्वर्षाणितत्प्रातःसवनंचतु
र्विंशत्यक्षरागायत्रीगायत्रंप्रातःसवनंतदस्यवस
वोन्वायत्ताःप्राणावाववसवएतेहीदंसर्वंवास
यंतितंचेदेतस्मिन्वयसिकिंचिदुपतपेत्सब्रूयात्प्रा
णावसवइदंमेप्रातःसवनमाध्यंदिनंसवनमनुसंतनु
तेतिमाहंप्राणानांवसूनांमध्येयज्ञोविलोप्सीयेत्यु
द्धैवततएत्यगदोहभवत्यथयानिचतुश्चत्वारिंशद्वर्षा

Digitized by ... New Delhi

Takshashila Project

णि तन्माध्यंदिनꣳ सवनं चतुश्चत्वारिꣳशदक्षरा त्रिष्टुप्त्रै
ष्टुभं माध्यंदिनꣳ सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वा
व रुद्रा एते हीदꣳ सर्वꣳ रोदयंति तं चेदेतस्मिन्वयसि
किंचिदुपतपेत्स ब्रूयात्प्राणा रुद्रा इदं मे माध्यंदिनꣳ स
वनं तृतीयसवनमनुसंतनुतेति माहं प्राणानाꣳ रुद्रा
णां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भव
त्यथ यान्यष्टाचत्वारिꣳशद्वर्षाणि तत्तृतीयसवनमा ६५

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ष्टाचत्वारिंशदक्षरा जगती जागतं तृतीयसवनं तदस्या

दित्वा अ ।यत्ताः प्राणा वावादित्या एते हीदं सर्वमा

ददते नं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा

आदित्या इदं मे तृतीयसवनमायुरनुसंतनुतेति माहं

प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत

एत्यगदो हैव भवत्येतद्ध स्म वै तद्विद्वानाह महिदास

ऐतरेयः स किं म एतदुपतपसि योहमनेन न प्रेष्यामी

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

तिमहषोडशंवर्षशतमजीवत्प्रहषोडशंवर्षशतंजीवति
यएवंवेद॥१६॥सयदशिशिषतियत्पिपासतियन्नरम
तेताअस्यदीक्षाअथयदश्नातियत्पिबतियद्रमतेतदु
पसदैरेत्यथयद्धसतियज्जक्षतियन्मैथुनंचरातिस्तुतश
स्त्रैरेवतदेत्यथयत्तपोदानमार्जवमहिंसासत्यवचन
मितिताअस्यदक्षिणास्तस्मादाहुःसोष्यत्यसो — तिपु
नरुत्पादनमेवास्यतन्मरणमेवावभृथस्तद्धैतद्घोरआं ९७

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स
बभूव सोंतवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युत
मसि प्राणसंशितमसीति तत्रैते द्वे ऋचौ भवतः आदि
त्प्रत्नस्य रेतस उद्वयं तमसस्परि ज्योतिः पश्यंत उत्तरं
स्वः पश्यंत उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममि
ति ज्योतिरुत्तममिति ॥ १७ ॥ मनो ब्रह्मेत्युपासीतेत्यध्यात्म
मथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्य

Takshashila Project

ध्यात्मंचाधिदैवतंचतदेतच्चतुष्पाद्ब्रह्मवाक्पादःप्राणः
पादश्चक्षुःपादःश्रोत्रंपादइत्यध्यात्ममथाधिदैवतमग्निः
ग्निःपादोवायुःपादआदित्यःपादोदिशःपादइत्युभ
यमेवादिष्टंभवत्यध्यात्मंचैवाधिदैवतंचवागेवब्रह्मण
श्चतुर्थःपादःसोऽग्निनाज्योतिषाभातिचतपतिचभाति
चतपतिचकीर्त्यायशसाब्रह्मवर्चसेनयएवंवेदप्राण
एवब्रह्मणःश्चतुर्थःपादःसवायुनाज्योतिषाभातिच ६५

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नपत्तिंचमातिंचत्तपत्तिंचकीर्त्तीयशश्चाब्रह्मवर्चसेन
यएवंवेदचक्षुरेवब्रह्मणस्तृतीयःपादःसआदित्ये
नज्योतिषान्नातिंचनपत्तिंचम्नातिंचतयनिंचकीर्त्तीय
शश्चाब्रह्मवर्चसेनयएवंवेदश्रोत्रमेवब्रह्मणश्चतु
र्थःपादःसदिग्भिर्ज्योतिषान्नातिंचत्तपत्तिंचमातिंच
तपत्तिंचकीर्त्तीयशश्चाब्रह्मवर्चसेनयएवंवेदयए
वंवेद॥ ५॥ आदित्याब्रह्मत्तेपादश्चात्तस्यपक्वाख्यान

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

मसदेवेदमग्रआसीत्तत्सदासीत्तत्समभवत्तदांडंनिरवर्त्त
तत्संवत्सरस्यमात्रामशयततन्निरभिद्यततेआंडकपा
लेरजतंचसुवर्णंचाभवतांतद्यद्रजतं॥सेयंपृथिवीय
त्सुवर्णं॥साद्यौर्यज्जरायुतेपर्वतायदुल्बं॥समेघोनी
हारोयाधमनयस्तानद्योयद्वास्तेयमुदकं॥ससमुद्रो
ऽथयत्तदजायतसोऽसावादित्यस्तंजायमानंघोषाउ
लूलवोऽनूदतिष्ठंत्सर्वाणिचभूतानिसर्वेचकामास्त ६९

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

स्मात्तस्योदयंप्रतिप्रत्यायनंप्रतिघोषाउलूलवोनू
त्तिष्टंतिसर्वाणिचभूतानिसर्वेचैवकामाःसयएत
मेवंविद्वानादित्यंब्रह्मेत्युपास्तेभ्याशोहयदेनंसा
धवोघोषाआचगछेयुरुपचनिंम्रेडेरन्निंम्रेडेरन्
१२॥ इतिपंचमःप्रपाठकःसमाप्तः॥ जानश्रुतिर्हपौ
त्रायणःश्रद्धादेयोबहुदायीबहुपाक्यआससहस
र्वतआवसथान्मापयांचक्रेसर्वतएवमेत्स्यंतीत्यथ

Takshashila Project

ह्हॅंसानिघ्नायामतिपेतुस्तदेवॅह्ॅंसाहॅसमराउ
इतिह्प्रतिजज्ञेसहकृत्वाविदमितिप्रस्पेया १ तदुहजानः
श्रुतिःपौत्रायणःष्पट्त्राणानिगवांनिष्कमश्वतरीरथंत
दादायप्रतिचक्रमेतॅहाभ्यवादरयिकेमानिषट्त्रा
णानिगवामयंनिष्कोयमश्वतरीरथोनुमएतांभगवोदे
वताॅंशाधियांदेवतामुपास्सइतितमुहपरःप्रत्युवाच
हहारेत्वाशूद्रतवैवसहगोभिरस्त्वितितदुहपुनरेवजा ७०

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नश्रुतिःपौत्रायणःसहस्रंगवांनिष्कमश्वतरीरथंदु
हितरंतदादायप्रतिचक्रमेतंहाभ्युवादरयिक्वेदं
सहस्रंगवामयंनिष्कोयमश्वतरीरथइयंजायायंग्रा
मोयस्मिन्नास्सेन्वेवमाभगवःशाधीतितस्याहमुखमुपो
द्गृह्णन्नुवाचाजाहारेमाःशूद्रानेनैवमुखेनालापयिष्य
थाइतितेहैतेरयिक्वपर्णानाममहावृषेषुयत्रास्मा
उवाससतस्मैहोवाच २ वायुर्वावसंवर्गोयदावाअग्नि

Digitized by Vaidika Bharata/Sarayu Trust, Maujpur, New Delhi

Takshashila Project

रुद्वायतिवायुमेवाप्येतियदासूर्योस्तमेतिवायुमेवाप्येति
यदाचंद्रोस्तमेतिवायुमेवाप्येतियदापउच्छुष्यंतिवायु
मेवापीयंतिवायुर्ह्येवैतांस्सर्वांस्संवृंक्त·इत्यधिदैवतमथा
ध्यात्मंप्राणोवावसंवर्गःसयदास्वपितिप्राणमेववाग
प्येतिप्राणंचक्षुःप्राणंश्रोत्रंप्राणंमनःप्राणोह्येवै
तांस्सर्वांस्संवृंक्त·इतितौवाएतौद्वौसंवर्गौवायुरेवदेवे
षुप्राणःप्राणेषुअथहशौनकंचकापेयमभिप्रतारिणंच ७१

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

काक्षसेनिंपरिविष्यमाणौब्रह्मचारीबिभिक्षेतस्माउह
नददतुःसहोवाचमहात्मनश्चतुरोदेवएकःकस्सज
गारभुवनस्यगोपास्तंकापेयनाभिपश्यंतिमर्त्याअभिप्र
तारिन्बहुधावसंतंयस्मैवाएतदन्नंतस्माएतन्नदत्त
मितितदुहशौनकःकापेयःप्रतिमन्वानःप्रत्येयाया।
त्मादेवानांजनिताप्रजानां॰हिरण्यद॰ष्ट्रोबभसोन
सूरिर्महांतमस्यमहिमानमाहुरनद्यमानोयदतन्न

Takshashila Project

मत्तीतिवैवयंब्रह्मचारिन्नेदमुपास्महेदत्तास्मैभिक्षा
मितितस्माउहदद्दुस्तेवाएतेपंचान्येपंचान्येदशसंतस्त
त्कृतंतस्मात्सर्वासुदिक्ष्वन्नमेवदशकृतं॰सैषाविरा
डन्नादीतयेदं॰सर्वंदृष्टं॰सर्वमस्येदंदृष्टंभवत्यन्नादो
भवतियएवंवेदयएवंवेद ३ सत्यकामोहजाबालो
जबालांमातरमामंत्रयांचक्रेब्रह्मचर्यंभवतिविवत्स्यामि
किंगोत्रोन्वहमस्मीतिसाहैनमुवाचनाहमेत ७१

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वेदतत्तद्यद्गोत्रस्त्वमसिबह्वहंचरंतीपरिचारिणीयौव
नेत्वामलभेसाहमेतन्नवेदयद्गोत्रस्त्वमसिजबालातु
नामाहमस्मिसत्यकामोनामत्वमसिससत्यकामएवजा
बालोब्रुवीथाइतिसहहारिद्रुमतंगौतममेत्योवाचब्र
ह्मचर्यंभगवतिवत्स्याम्युपेयांभगवंतमितितंहोवा
चकिंगोत्रोनुसोम्यासीतिसहोवाचनाहमेतद्वेदभो
यद्गोत्रोहमस्म्यपृच्छंमातरंसामाप्रत्यब्रवीद्बह्वहं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

चरंतीपरिचारिणीयौवनेत्वामलभेसाहमेतन्नवेदयद्गोत्रस्त्व
मसिजबालातुनामाहमस्मिसत्यकामोनामत्वमसीतिसोहं
सत्यकामोजाबालोस्मिभोइतितं होवाचनैतदब्राह्मणो
विवक्तुमर्हतिसमिधं सोम्याहरोपत्वानेष्येनसत्यादगाइ
तितमुपनीयकृशानामबलानांचतुःशतागानिराकृत्योवा
चेमाःसोम्यानुसंव्रजेतिताअभिप्रस्थापयन्नुवाचनासहस्रे
णावर्तयेतिसहवर्षगणंप्रोवासतायदासहस्रं संपेदुः ७३

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

४ अथहैनमृषभोऽभ्युवादसत्यकामा ३ इतिभगवइति
हप्रतिशुश्रावप्राप्ताःसौम्यसहस्रंस्मःप्रापयनआचार्य
कुलंब्रह्मणश्चतेपादंब्रवाणीतिब्रवीतुमेभगवानिति
तस्मैहोवाचप्राचीदिक्कलाप्रतीचीदिक्कलादक्षिणादि
क्कलोदीचीदिक्कलैषवैसोम्यचतुष्कलःपादोब्रह्मणः
प्रकाशवान्नामसयएतमेवंविद्वांश्चतुष्कलंपादंब्रह्म
णःप्रकाशवानित्युपास्तेप्रकाशवानस्मिंल्लोकेभवति।

Takshashila Project

प्रकाशवतोहलोकाञ्जयतियएतमेवंविद्वांश्चतुष्कलंपा
दंब्रह्मणःप्रकाशवानित्युपास्ते ५ अग्निष्टेपादंवक्तेति
सहश्वोभूतेगाअभिप्रस्थापयांचकारतायत्राभिसायंब
भूवुस्तत्राग्निमुपसमाधायगाउपरुध्य समिधमाधायपश्चा
दग्नेःप्राङुपोपविवेशतमग्निरभ्युवादसत्यकाम३इति
भगवइतिहप्रतिशुश्रावब्रह्मणःसोम्यतेपादंब्रवाणीतिब्र
वीतुमेभगवानितितस्मैहोवाचपृथिवीकलांतरिक्षंक ७४

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

लाद्यौःकलासमुद्रःकलैषवैसोम्यचतुष्कलःपादो
ब्रह्मणोनंतवान्नामसयएतमेवंविद्वांश्चतुष्कलंपा
दंब्रह्मणोनंतवानित्युपास्तेनंतवानस्मिंलोकेभवत
नंतवतोहलोकाञ्जयतियएतमेवंविद्वांश्चतुष्क
लंपादंब्रह्मणोनंतवानित्युपास्ते ६ हंसस्तेपादंवक्ते
तिसहश्वोभूतेगाअभिप्रस्थापयांचकारतायत्राभिसा
यंबभूवुस्तत्राग्निमुपसमाधायगाउपरुध्यसमिधमा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

धाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥ तमग्निरभ्यु
वाद सत्यकामा३ इति इति भगव इति ह प्रतिशुश्राव ब्रह्म
णः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै ।
होवाचाग्निः कला सूर्यः कला चंद्रः कला विद्युत्कलै
ष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम
स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मा
नित्युपास्ते ज्योतिष्मानस्मिंल्लोके भवति ज्योतिष्मतो ह ७५

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

लोकांजयतियएतंमेवंविद्वांश्चतुष्कलंपादंब्रह्मणो
ज्योतिष्मानित्युपास्ते ७ मद्गुष्टेपादंवक्तेतिसहश्वोभू
तेगाअभिप्रस्थापयांचकारतायत्राभिसायंबभूवु
स्तत्राग्निमुपसमाधायगाउपरुध्यसमिधमाधायपश्चा
दग्नेःप्राङुपोपविवेशतंमद्गुरुपनिपत्याभ्युवादसत्य।
कामा३इतिभगवइतिहप्रतिशुश्रावब्रह्मणःसोम्यते
पादंब्रवाणीतिब्रवीतुमेभगवानितितस्मैहोवाचप्राणः

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

कलाचक्षुःकलाश्रोत्रंकलामनःकलैषवैसोम्यचतुष्क
लःपादोब्रह्मणआयतनवान्नामसयएतमेवंविद्वांश्चतु
ष्कलंपादंब्रह्मणआयतनवानित्युपास्तआयतनवान
स्मिंलोकेभवत्यायतनवतोहलोकाञ्जयतियएतमेवं
विद्वांश्चतुष्कलंपादंब्रह्मणआयतनवानित्युपास्ते ८
प्रापहाचार्यकुलंतमाचार्योभ्युवादसत्यकाम३इति।
भगवइतिहप्रतिशुश्रावब्रह्मविदिववैसोम्यभासिकोनु। ७६

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

त्वानुशशासेत्यन्येमनुष्येभ्य इतिहप्रतिजज्ञेभगवाँस्त्वे
वमेकामेब्रूयाच्छ्रुतँह्येवमेभगवद्दृशेभ्य आचार्याद्धैव
विद्याविदितासाधिष्ठंप्रापतीतितस्मैहैतदेवोवाचा
त्रहनकिंचनवीयायेतिवीयायेति २ उपकोसलोह
वैकामलायनःसत्यकामेजाबालेब्रह्मचर्यमुवासतस्य
हद्वादशवर्षाण्यग्नीन्परिचचारसहस्मान्यानंतेवासि
नःसमावर्त्तयँस्तँहस्मैवनसमावर्त्तयतितंजायोवा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

चतप्तोब्रह्मचारीकुशलमग्नीन्परिचचारीन्मात्वाग्नय
ःपरिप्रवोचन्प्रब्रूह्यस्माइतितस्मैहाप्रोच्यैवप्रवासांचक्रे
सहव्याधिनानशितुंदध्रेतमाचार्यजायोवाचब्रह्मचारि
न्नशानकिंनुनाश्नासीतिसहोवाचबहवइमेस्मिन्पुरु
षेकामानानात्ययाव्याधिभिःप्रतिपूर्णोस्मिनाशिष्यामी
त्यथहाग्नयःसमूदिरेतप्तोब्रह्मचारीकुशलंनःपर्य
चारीद्धंतास्मैप्रब्रवामेतितस्मैहोचुःप्राणोब्रह्मकंब्रह्म ७७

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

खंब्रह्मेतिसहोवाचविजानाम्यहंयत्प्राणोब्रह्मकंचतु
खंचनविजानामीतितेहोचुर्यद्वावकंतदेवखंयदेवखं
तदेवकमितिप्राणंचहास्मैतदाकाशंचोचुः १० अ
थहैनंगार्हपत्योनुशशासपृथिव्यग्निरन्नमादित्यइ
तियएषआदित्येऽपुरुषोदृश्यतेसोहमस्मिसएवा
हमस्मीतिसयएतमेवंविद्वानुपास्तेपहतेपापकृत्यां
लोकीभवतिसर्वमायुरेतिज्योग्जी— तिनास्यावरपु

Takshashila Project

रुषाःक्षीयंतउपवयंतंभुंजामोस्मिंश्चलोकेमुष्मिंश्च
यएतमेवंविद्वानुपास्ते ११ अथहैनमन्वाहार्यप
चनोनुशशासापोदिशोनक्षत्राणिचंद्रमाइतियएष
चंद्रमसिपुरुषोदृश्यतेसोहमस्मिसएवाहमस्मीतिस
यएतमेवंविद्वानुपास्तेपहतेपापकृत्यांलोकीभव
तिसर्वमायुरेतिज्योग्जीवतिनास्यावरपुरुषाःक्षीय
उपवयंतंभुंजामोस्मिंश्चलोकेमुष्मिंश्चयएतमेवं ७८

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

विद्वानुपास्ते १२ अथहैनमाहवनीयोनुशशासप्रा
णआकाशोद्यौर्विद्युदितियएषविद्युतिपुरुषोदृश्य
तेसोहमस्मिसएवाहमस्मीतिसयएतमेवंविद्वानुपास्ते
पहतेपापकृत्यांलोकीभवतिसर्वमायुरेतिज्योग्जीव
तिनास्यावरपुरुषाःक्षीयंतउपवयंतंभुंजामोस्मिंश्च
लोकेमुष्मिंश्चयएतमेवंविद्वानुपास्ते १३ तेहो
चुरुपकोसलैषासोम्यतेस्मद्विद्यात्मविद्याचाचा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

र्यस्तुतेगतिंवक्तेसाजगामहास्याचार्यस्तमाचार्योभ्युवा
दोपकोसला३इतिभगवइतिहप्रतिशुश्रावब्रह्मविदइ
वसोम्यतेमुखंभातिकोनुत्वानुशशासेतिकोनुत्वानुशा
शासेतिकोनुमानुशिष्याद्भो इतीहापेवनिह्नुतइमेनून
मीदृशाअन्यादृशाइतीहाग्नीनभ्यूदेकिंनुसोम्यकिल
तेवोचन्नितीदमितिहप्रतिजज्ञेलोकान्वावकिलसोम्या
तवोचंन्नहंतुतेतद्वक्ष्यामियथापुष्करपलाशआपोन ७२

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

श्लिष्यंतएवमेवंविदिपापंकर्मनश्लिष्यतइतिब्रवीतु
मेभगवानितित्तस्मैहोवाच ७४ यएषोक्षिणिपुरुषोदृ
—श्यतएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेतित
द्यद्यप्यस्मिन्सर्पिर्वोदकंवासिंचतिवर्त्मनीएवगच्छसे
त॰संयद्वामइ———क्षतएत॰हिसर्वाणिवामान्य
भिसंयंतिसर्वाण्येनंवामान्यभिसंयंतियएवंवेदेषउए
ववामानीरेषहिसर्वेषुलोकेषुभातिसर्वेषुलोकेषु

Takshashila Project

ज्ञातियर्ह्येवेदाथायजेचैवास्मिंछंयंकुर्वंतीतियद्वेवनादि
षमेवातिसन्नंवसर्विषोहरत्यापूर्यमाणपक्षमापूर्यमा
णपक्षाद्वान्यद्ददेतिमासाꣳस्तान्मासेभ्यःसंवत्सरꣳ
संवत्सरादादित्यमादित्याच्चंद्रमसंचंद्रमसोविश्वंतंत
स्करुषोमानवःसएनान्ब्रह्मगमयत्येषदेवपथ्योब्रह्मप
थएतेनप्रतिपद्यमानाइमंमानवमावर्त्तनावर्त्तिनाव
र्तंति १५ एषद्वैयज्ञोयोयंपवतएषद्वंयंनिदꣳस ८०

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वैंपुनातियदेषपन्निदꣳसर्वंपुनातितस्मादेषएव —
— ज्ञवर्त्तनीतयोरन्यतरामनसासꣳस्करोतिब्रह्मावाचा
होताध्वर्युरुद्गातान्यतरासयत्रोपाकृतेप्रातरनुवाकेपु
रापरिधानीयायाब्रह्माव्यववदत्यन्यतरामेववर्त्तनिꣳ
ꣳसꣳस्करोतिहीयतेन्यतरासयथैकपाद्व्रजन्रथोवैके
नचक्रेणवर्त्तमानोरिष्यत्येवमस्ययज्ञोरिष्यतियज्ञꣳ
रिष्यंतंयजमानोनुरिष्यतिसइष्ट्वापापीयन्भवत्यथ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

यत्रोपाकृतेप्रातरनुकेमपुरापरिधानीयायाब्रह्मान्यव
वदस्कन्नेएववर्त्ततीसःस्कुर्वंतिनदीयत्तेन्यतरामययथो
नययाद्रुजन्नग्धोवोमान्मांचक्रान्मांवित्तेमानःप्रतिति
ष्ठसेवमस्ययज्ञःप्रतितिष्ठतियज्ञंप्रतितिष्ठंतंयजमा।
नोनुप्रतितिष्ठतिसदद्वा अपान्नावति १६ प्रजाप
तिर्लोकानभ्यतपत्तेषांतप्यमानानांरसान्प्राबृहद।
ग्निंपृथिव्यावायुमंतरिक्षादादित्यंदिवःसएतास्तिस्रो ८

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

देवताअस्पतपत्नामंतष्यमान्यनाॅरसान्प्राहृहदग्ने
र्केचोचायोर्यजूॅषिसामान्यादित्साक्षरनंात्रयी विद्य
मस्यनपत्तस्यान्तष्यमानायारसान्प्राहृहज्जरित्पग्न्यानुव
रितियजुर्भ्यः स्वरितिसाममस्परत्तद्यत्पृहः— क्तोरिष्येद्भूः
स्वाहेतिगार्हपत्सेजुहुयादृचामेवतद्रसेनर्चावीर्येणर्चाय
ज्ञस्यविरिष्टॅसंदधात्यथयदिपजुष्टोरिष्येद्भुवः स्वाहे
तिदक्षिणाग्नौजुहुयाद्यजुषामेरतद्रसेनयजुषांवी

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

र्येण यजुषां यज्ञस्य विरिष्टं संदधक्त्स्फ्यय यदि सामतो रिष्टं
ष्टः स्वाहेत्याहवनीये जुहुयात्साम्नामेव तद्रसेन साम्नां
वीर्येण साम्नां यज्ञस्य विरिष्टं संदधाति तद्यथा लवणे
न सुवर्णं संदध्यात्सुवर्णेन रजतं रजतेन त्रपु त्रपुणा
सीसं सीसेन लोहं लोहेन दारु दारु चर्मणैवामषां लो
कानामासां देवतानामस्याः त्रय्या विद्याया वीर्येण यज्ञ
स्य विरिष्टं संदधाति भेषजकृतो ह वा एष यज्ञो यत्रैवं ८२

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

विद्ध एमानवत्सेष ह वा उदक्प्रवणो यज्ञो यत्रैवंविद्ब्रह्मा
भवत्येवंविदꣳ ह वा एषा ब्रह्माणमनुगाथा यतो यत आ
वर्त्तते तत्तद्गच्छति मानवो ब्रह्मैवैकऋत्विक्कुरूनश्वाभि
रक्षत्येवंविद्ध वै ब्रह्मा यज्ञं यजमानꣳ सर्वाꣳश्चर्त्विजो
ऽभिरक्षति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं
नानेवंविदं ॥१७॥ इति षष्ठमः प्रपाठकः समाप्तः ॥ छ
यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्रा

Takshashila Project

णोवावज्येष्टश्चश्रेष्टश्चयोहवैवसिष्टंवेदवसिष्टोहस्वा
नांभवतिवाग्वाववसिष्टोयोहवैप्रतिष्टांवेदप्रतिहतिष्ट
त्यस्मिंऽश्चलोकेमुष्मिंऽश्चचक्षुर्वावप्रतिष्टायोहवैसंप
वेदसऽहास्मैकामाःपद्यंतेदैवाश्चमानुषाश्चश्रोत्रंवाव
संपद्योहवाआयतनंवेदायतनंऽस्वानांभवतिमनोहवा
आयतनमथहप्राणाअहंऽश्रेयसिव्यूदिरेहंऽश्रेयान
स्म्यहंऽश्रेयानस्मीतितेहप्राणाःप्रजापतिंपितरमेत्योचु ८३

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

र्भगवन्कोनःश्रेष्ठइतितान्होवाचयस्मिन्वउत्क्रांतेशरीरं
पापिष्टतरमिवदृश्येतसवःश्रेष्ठइतिसाहवागुच्चक्रामसासं
वत्सरंप्रोष्यपर्येत्योवाचकथमशकततर्त्तेमज्जीवितुमिति
यथाकलाअवदंतःप्राणंतःप्राणेनपश्यंतश्चक्षुषाशृण्वं
तःश्रोत्रेणध्यायंतोमनसैवमितिप्रविवेशहवाक्चक्षु—
रुच्चक्रामतत्संवत्सरंप्रोष्यपर्येत्योवाचकथमशकततर्त्तेमज्जी
वितुमितियथांधाअपश्यंतःप्राणंतःप्राणेनवदंतोवाचा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

शृएवंतःश्रोत्रेणध्यायंतोमनसैवमितिप्रविवेशहचक्षुःश्रो
त्रंहोच्चक्रामतत्संवत्सरंप्रोष्यपर्येत्योवाचकथमशकतर्तेमज्जी
वितुमितियथाबधिराअशृएवंतःप्राणंतःप्राणेनवदंतोवा
चापश्यंतश्चक्षुषाध्यायंतोमनसैवमितिप्रविवेशहश्रोत्रं
मनोहोच्चक्रामतत्संवत्सरंप्रोष्यपर्येत्योवाचकथमशकतर्ते
मज्जीवितुमितियथाबालाअमनसःप्राणंतःप्राणेनवदंतो।
वाचापश्यंतश्चक्षुषाशृएवंतःश्रोत्रेणैवमितिप्रविवेशहम ८४

Takshashila Project

नोथहप्राणउच्चिक्रमिषंस यथासुहयःषड्वीं॰शशंकूंसं
खिदेदेवमितरान्प्राणांत्समखिदत्तं॰हाभिसमेत्योचुर्भगव
न्नेधित्वंनश्रेष्ठोसिमोत्क्रमीरित्यथहैनंवागुवाचयदहंवसि
ष्ठोस्मित्वंतद्वसिष्ठोसीत्यथहैनंचक्षुरुवाचयदहंप्रतिष्ठास्मि
त्वंतत्प्रतिष्ठासीत्यथहैनं॰श्रोत्रमुवाचयदहं॰संपदस्मि
त्वंतत्संपदसीत्यथहैनंमनउवाचयदहमायतनमस्मि
त्वंतदायतनमसीतिनवैवाचोनचक्षूं॰षिनश्रोत्राणि

नमनांसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि स
र्वाणि भवति १ स होवाच किं मेऽन्नं भविष्यतीति यत्किंचिदि
दमाश्वभ्य आशकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह
वै नाम प्रत्यक्षं न ह वा एवंविदि किंचनानन्नं भवतीति स
होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतद
शिष्यंतः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लंभुको ह वा
सो भवत्यनग्नो ह भवति तद्धैतत्सत्यकामो जाबालो गोश्रु ८५

Takshashila Project

तयेवैयाघ्रपद्यायोक्त्वोवाचयद्यप्येनच्छुष्कायस्थाणवेब्रूया
ज्जायेरन्नेवास्मिंछाखाःप्ररोहेयुःपलाशानीत्यथयदिम
हज्जिगमिषेदमावास्यायांदीक्षित्वापौर्णमास्यांरात्रौ
सर्वौषधस्यमंथंदधिमधुनोरुपमथ्यज्येष्ठायश्रेष्ठायस्वा
हेत्यग्नावाज्यस्यहुत्वामंथेसंपातमवनयेद्वसिष्ठायस्वाहे
त्यग्नावाज्यस्यहुत्वामंथेसंपातमवनयेत्प्रतिष्ठायैस्वाहे
त्यग्नावाज्यस्यहुत्वामंथेसंपातमवनयेत्संपदेस्वाहेत्य

Digitized by Vaidika Bharata/Suparna Trust, Munirka, New Delhi.

Takshashila Project

ग्नाच्चाज्यस्यकृत्वामंथेसंपातमवनयेदायतनायस्वाहेत्य
ग्नाचाज्यकृत्वाज्जंयेसंपातमवनायदथप्रतिसृप्यांजलोमंथ
माधायजपत्यमोनामास्यमाहितेवर्वमिदꣳसहिज्येष्ठःश्रेष्ठो
राजाधिपतिःसमाज्यैष्ठ्यꣳश्रैष्ठ्यꣳराज्यमाधिपत्यंगमयत्व
हमेविदꣳसर्वमसानीसथखल्वेतयर्चोपछश्राचामतितत्स
वितुर्वृणीमहइत्याचामतिवयंदेवस्यभोजनमित्याचाम
तिश्रेष्ठꣳसर्वधातममित्याचामतितुरंभगस्यधीमहीति ९६

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सर्वं पिबति निर्णिज्य कंसं चमसं वा पश्चादग्नेः संविशति
चर्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत्स
मृद्धं कर्मेति विद्यात्तदेष श्लोको यदा कर्मसु काम्येषु स्त्रि
यं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिद
र्शने तस्मिन्स्वप्ननिदर्शने २ श्वेतकेतुर्हारुणेयः पञ्चा
लानां समितिमेयाय तं ह प्रवाहणो जैवलिरुवाच कु
मारानु त्वाशिषत्पितेत्यनु हि भगव इति वेत्थ यदितोऽधि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

प्रजाःप्रयंतीतिनभगावइतिवोऽ छयथापुनरावर्त्तना ३६

तिनभगवइतिवेछयेदिवं [illegible] यानस्यपितयाएस्यच

यावर्त्तना ३ इतिनभगवइतिवेछयथासोलोकानसंपूर्यता

३ इतिवभगवइतिवेछयथापंचम्यामाऽहुतावापःपुरुष

ःवचसोलोनवंतीतिनैवभगवइःस्यथनुकिमनुशिष्टोवोच

थायोहीमानिनविद्याकथंमोनुशिष्टोब्रवीतेतिसहा

यस्तःपितुरर्धमेयायतंऽहोवाचानमनुशिष्टवाचाकिल ८७

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

माभगवानब्रवीदनुत्वाशिषमितिपंचमाराजन्यबंधुःप्रश्ना
नप्राक्षीत्तेषांनैकंचनाशकंविवक्तुमितिसहोवाचयथा
मात्वंतदेतानवदोयथाहमेषांनैकंचनवेदयद्यहमिमा
नवेदिष्यंकथंतेनावक्ष्यमितिसहगौतमोराज्ञोर्धमे
यायतस्मैहप्राप्तायार्हांचकारसहप्रातःसभागउदेया
यतंहोवाचमानुष्यस्यभगवन्गौतमवित्तस्यवरंवृणी
थाइतिसहोवाचतवैवराजन्मानुषंवित्तंयामेवकुमार

Takshashila Project

स्यांतवाचमभाषथास्तामेवमेब्रूहीतिसहकृछ्रीबभूवतं
हचिरंवसेत्याज्ञापयांचकारतंहोवाचयथामात्वंगौतम
वादोयथेयन्नप्राक्त्वत्तःपुराविद्याब्राह्मणान्गछतित
स्मादुसर्वेषुलोकेषुक्षत्रस्यैवप्रशासनमभूदितितस्मैह
वाच २ असौवावलोकोगौतमाग्निःतस्यादित्यएवस
मिद्रश्मयोधूमोहरर्चिश्चंद्रमाअंगारानक्षत्राणिविस्फु
लिंगास्तस्मिन्नेतस्मिन्नग्नौदेवाःश्रद्धांजुह्वतितस्याआ ७८

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

कृतेःसोमोराजासंभवति ४ पर्जन्योवावगौतमाग्निस्तस्यवा
युरेवसमिदभ्रंधूमोविद्युदर्चिरशनिरंगाराह्रादनयोविस्फु
लिंगास्तस्मिन्नेतस्मिन्नग्नौदेवाःसोमंराजानंजुह्वतितस्या
आहुतेर्वर्षंसंभवति ५ पृथिवीवावगौतमाग्निस्तस्याः
संवत्सरएवसमिदाकाशोधूमोरात्रिरर्चिर्दिशोंगाराअवा
न्तरदिशोविस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौदेवावर्षंजुह्व
तितस्याआहुतेरन्नंसंभवति ६ पुरुषोवावगौतमाग्नि

Takshashila Project

स्तस्य वागेव समित्प्राणो धूमो जिह्वार्चिश्चक्षुरंगाराश्श्रोत्रं विस्फु
लिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुते रे
तः संभवति ७ योषा वाव गौतमाग्निस्तस्या उपस्थ एव स
मिद्यदुपमंत्रयते स धूमो योनिरर्चिर्यदंतः करोति ते ऽगारा अभि
नंदा विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या
आहुतेर्गर्भः संभवति ८ इति तु पंचम्यामाहुतावापः पुरु
षवचसो भवंतीति स उल्बावृतो गर्भो दश वा मासानंतःश्रा ८२

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

यित्वायावद्वाथजायतेसजातोयावदायुषंजीवतितंप्रेतं
दिष्टमितोग्नयएवहरंतियतएवेतोयतःसंभूतोभवति
२ तद्यइत्थंविदुर्येचेमेरण्येश्रद्धातपइत्युपासतेतेर्चि
षमभिसंभवंत्यर्चिषोहरह्नआपूर्यमाणपक्षमापूर्यमा
णपक्षाद्यान्षडुदङ्ङेतिमासांस्तान्मासेभ्यःसंवत्सरं
संवत्सरादादित्यमादित्याच्चंद्रमसंचंद्रमसोविद्युतंतत्पु
रुषोमानवःसएनान्ब्रह्मगमयत्येषदेवयानःपंथाइ

अथ य इमे ग्राम इष्टापूर्त्ते दत्तमित्युपासतेते धूममभिसंभवं
त्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति
मासांस्तान्नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः पितृलोकं
पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवा
नामन्नं तं देवा भक्षयंति तस्मिन्यावत्संपातमुषित्वाथैतमेवा
ध्वानं पुनर्निवर्त्तंते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा
धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो १०

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

भूत्वाप्रवर्षंतितइहव्रीहियवाओषधिवानस्पतयस्तिलमा
षाइतिजायंतेतोवैखलुदुर्निष्प्रपतरंयोयोह्यन्नमत्ति
योरेतःसिंचतितद्भूयएवभवतितद्यइहरमणीयचरणा
अभ्याशोहयत्तेरमणीयांयोनिमापद्येरन्ब्राह्मणयोनि
वाक्षत्रिययोनिंवावैश्ययोनिंवाथयइहकपूयचरणा
अभ्याशोहयत्तेकपूयांयोनिमापद्येरञ्छ्वयोनिंवासूकर
योनिंवाचंडालयोनिंवाथैतयोःपथोर्नकतरेणचनता

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नीमानिक्षुद्राण्यसकृदावर्तीनिभूतानिभवंतिजायस्वम्रिय
स्वेत्येतत्तृतीयꣳस्थानंतेनासौलोकोनसंपूर्यतेतस्माज्जुगु
प्सेततदेषश्लोकःस्तेनोहिरण्यस्यसुरांपिबꣳश्चगुरोस्तल्पमा
वसन्ब्रह्महाचैतेपतंतिचत्वारःपंचमश्चाचरꣳस्तैरितिअथ
हयएतानेवंपंचाग्नीन्वेदनसहतैरप्याचरन्पाप्मनालिप्य
तेशुद्धःपूतःपुण्यलोकोभवतियएवंवेदयएवंवेद १०प्रा
चीनशालऔपमन्यवःसत्ययज्ञःपौलुषिरिंद्रद्युम्नोभा २१

Takshashila Project

माल्लवेयोजनःशार्कराक्षोबुडिलआश्वतराश्विस्तेहैतेम
हाशालामहाश्रोत्रीयाःसमेत्यमीमांसांचक्रुःकोनआ
त्माकिंब्रह्मेतितेहसंपादयांचक्रुरुद्दालकोवैभगवंतोय
मारुणिःसंप्रतीममात्मानंवैश्वानरमध्येतितꣳहंता
भ्यागच्छामेतितꣳहाभ्याजग्मुःस हसंपादयांचकार
प्रक्ष्यंतिमामिमेमहाशालामहाश्रोत्रियास्तेभ्योनसर्व
मिवप्रतिपत्स्यहंती हमन्यमन्य— शासा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नीतितान्होवाचाश्वपतिर्वैभगवंतोयंकैकेयःसंप्रतीममा
त्मानंवैश्वानरमध्येतितꣳहंताभ्यागछामेतितꣳहाभ्याज
गमुस्तेभ्योहप्राप्तेभ्यःपृथगर्हाणिकारयांचकारसहप्रातः
संजिहानउवाचनमेस्तेनोजनपदेनकदर्योनमद्यपोना
नाहिताग्निर्नाविद्वान्नस्वैरीस्वैरिणीकुतोयक्ष्यमाणोवै
भगवंतोहमस्मियावदेकैकस्माऋत्विजेधनंदास्यामि
तावद्भगवद्भ्योदास्यामिवसंतुभगवंतइतितेहोचुर्येनह २२

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वार्थेनपुरुषश्चरेत्तं॰हैववदेदात्मानमेवेमंवैश्वानरं॰सं
प्रत्यध्येषितमेवनोब्रूहीतितान्होवाचप्रातर्वःप्रतिवक्ता
स्मीतितेहसमित्पाणयःपूर्वाह्णेप्रतिचक्रमिरेतान्हानु
पनीयैवैतदुवाच ११ औपमन्यवकंत्वमात्मानमुपा:
स्सइतिदिवमेवभगवोराजन्नितिहोवाचैषवैसुतेजा
आत्मावैश्वानरोयंत्वमात्मानमुपास्सेतस्मात्तवसुतंप्र
सुतमासुतंकुलेदृश्यतेऽत्स्यन्नंपश्यसिप्रियमत्स्यन्नंपश्य

Takshashila Project

त्तिप्रियंभवत्यस्यब्रह्मवर्चसंकुलेयएतमेवमात्मानंवैश्वा
नरमुपास्तेमूर्द्धात्वेषआत्मानइतिहोवाचमूर्द्धातेव्यपतिष्य
द्यन्मान्नागमिष्यइति १२ अथहोवाचसत्ययज्ञंपौलुषिं
प्राचीनयोग्यकंत्वमात्मानमुपास्सइत्यादित्यमेवभगवो
राजन्नितिहोवाचैषवैविश्वरूपआत्मावैश्वानरोयंत्वमा
नमुपास्सेतस्मात्तवबहुविश्वरूपंकुलेदृश्यतेप्रवृत्तोश्वत
रीरथोदासीनिष्कोत्स्यन्नंपश्यसिप्रियमत्स्यन्नंपश्यतिप्रि २३

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

यंभवत्यस्यब्रह्मवर्चसंकुलेयएतमेवमात्मानंवैश्वानरमु
पास्तेचक्षुष्ट्वेतदात्मनइतिहोवाचांधोऽभविष्यद्यन्मांनाग
मिष्यइति १३ अथहोवाचेन्द्रद्युम्नंभाल्लवेयंवैयाघ्रप
द्यकंत्वमात्मानमुपास्सइतिवायुमेवभगवोराजन्निति
होवाचैषवैपृथग्वर्त्मात्मावैश्वानरोयंत्वमात्मानमुपा
स्सेतस्मात्त्वांपृथग्बलयआयंतिपृथग्रथश्रेणयोनु
यंत्यत्स्यन्नंपश्यसिप्रियमत्त्यन्नंपश्यतिप्रियंभवत्यस्यब्र

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ह्मवर्च्चसंकुलेयएतमेवमात्मानंवैश्वानरमुपास्तेप्राणस्त्वेष
आत्मनइतिहोवाचप्राणस्तउदक्रमिष्यद्यन्मांनागमिष्यइ
ति १४ अथहोवाचजनंशार्कराक्ष्यंशार्कराक्षकंत्व
मात्मानमुपास्सइत्याकाशमेवभगवोराजन्नितिहोवाचैष
वैबहुलआत्मावैश्वानरोयंत्वमात्मानमुपास्सेतस्मात्त्वंब
हुलोसिप्रजयाचधनेनचात्स्यन्नंपश्यसिप्रियमत्त्यन्नंपश्य
तिप्रियंभवत्यस्यब्रह्मवर्च्चसंकुलेयएतमेवमात्मानंवैश्वा २९

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नरमुपास्ते संदेहस्त्वेषआत्मन इति होवाच संदेहस्ते व्यशी
र्यद्यन्मान्नागमिष्यति १५ अथहोवाचबुडिलमाश्वतरा
श्विंवैयाघ्रपद्य कंत्वमात्मानमुपास्स इत्यपएवभगवोरा
जन्निति होवाचैषवैरयिरात्मावैश्वानरोयंत्वमात्मानमुपा
स्सेतस्मात्त्वंरयिमान्पुष्टिमानस्यत्स्यन्नंपश्यसिप्रियमत्त्य
न्नंपश्यतिप्रियंभवत्यस्यब्रह्मवर्चसंकुलेयएतमेव
मात्मानंवैश्वानरमुपास्तेवस्तिस्त्वेषआत्मन इति होवाचव

Takshashila Project

स्तिस्तेव्यपतिष्यद्यन्मान्नागमिष्यइति १६ अथहोवाचोद्दालक
मारुणिंगौतमकंत्वमात्मानमुपास्सइतिपृथिवीमेवभगवोरा
जन्नितिहोवाचैषवैप्रतिष्ठात्मावैश्वानरोयंत्वमात्मानमुपास्से
तस्मात्वंप्रतिष्ठितोसिप्रजयाचपशुभिश्चात्स्यन्नंपश्यसिप्रियम
त्स्यन्नंपश्यतिप्रियंभवत्यस्यब्रह्मवर्चसंकुलेयएतमेवमात्मानं
वैश्वानरमुपास्तेपादौत्वेतावात्मनइतिहोवाचपादौतेव्यम्ला
स्येतांयन्मान्नागमिष्यइति १७ तान्होवाचैतेवैखलुयूयं २५

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

प्रथगिवेममात्मानंवैश्वानरंविद्वांसोन्नमत्तियस्त्वेतमेवंप्रा
देशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तेससर्वेषुलो
केषुसर्वेषुभूतेषुसर्वेष्वात्मस्वन्नमत्तितस्यहवाएतस्यात्म
नोवैश्वानरस्यमूर्द्धैवसुतेजाश्चक्षुर्विश्वरूपःप्राणःपृथग्व
र्त्मात्मासंदेहोबहुलोबस्तिरेवरयिःपृथिव्येवपादावुर
एववेदिर्लोमानिबर्हिर्हृदयंगार्हपत्योमनोन्वाहार्यपच
नआस्यमाहवनीय १८ तद्यद्भक्तंप्रथममागच्छेत्तद्धोमी

यं॰ स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहे
ति प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्य
त्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां य
त्किंच द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्य
ति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति १२ अथ
यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्य
